# Lakshmiproktam Pradoshakale Shivopasanopadesham

# લક્ષ્મીપ્રોક્તં પ્રદોષકાલે શિવોપાસનોપદેશમ્

## Document Information

Text title : Lakshmiproktam Pradoshakale Shivopasanopadesham

File name : lakShmIproktaMpradoShakAleshivopAsanopadesham.itx

Category : shiva, lakShmI, upadesha, advice, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 11 | 327.2-347||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# લક્ષ્મીપ્રોક્તં પ્રદોષકાલે શિવોપાસનોપદેશમ્

- લક્ષ્મીવિષ્ણુસંવાદે -

શ્રીલક્ષ્મીરુવાચ -

સાયઙ્કાલે મહાદેવઃ પૂજનીયોઽખિલૈરપિ ॥ ૩૨૭॥

કુરુ ભસ્મોદ્ધૂલનાદિ સર્વપાપવિનાશકમ્ ।
બિલ્વપત્રાદિ સમ્પાદ્ય યજ દેવોત્તમં શિવમ્ ॥ ૩૨૮॥

પ્રણામાનિ(?) કુરુ પ્રીત્યા શરણં વ્રજ શઙ્કરમ્ ।
સર્વેષ્વપિ પ્રદોષેષુ પૂજનીયઃ સદા શિવઃ ॥ ૩૨૯॥

ઇદાનીં સપ્તમીયોગો વિશેષેણાદ્ય વર્તતે ।
યઃ સપ્તમીપ્રદોષેષુ શઙ્કરં પૂજયિષ્યતિ ॥ ૩૩૦॥

ન તસ્ય નરકાવાસો દારિદ્ર્યં ચ ન સર્વથા ।
પ્રદોષકાલે ભગવાન્ મહાદેવઃ સુરાધિપઃ ॥ ૩૩૧॥

કરોતિ તાણ્ડવં દેવીમુપવેશ્ય શુભાસને ।
તાણ્ડવાભિરતં દેવં ગ્રહનક્ષત્રમૌલિનમ્ ॥ ૩૩૨॥

હૃદિ ધ્યાત્વા મહાદેવં પૂજયસ્વ(?) સુરોત્તમ ।
અભિષિચ્ય મહાદેવં લિઙ્ગરૂપિણમવ્યયમ્ ॥ ૩૩૩॥

ક્ષીરેણાજ્યેન શુદ્ધૈશ્ચ જલૈર્નીહારસન્નિભૈઃ ।
ગૃહીત્વા ચન્દનં રમ્યં શિવલિઙ્ગં સમર્ચય ॥ ૩૩૪॥

એતૈર્નવૈર્બિલ્વપત્રૈરભ્યર્ચ્ય મહેશ્વરમ્ ।
ધૂપદીપાદિકં દત્વા નૈવેદ્યં ચ સમર્પય ॥ ૩૩૫॥

પ્રણામાનિ (?) કુરુ પ્રીત્યા શૈવં પઞ્ચાક્ષરં જપ ।
કુરુ નૃત્યં મહાદેવપ્રીત્યર્થં કરતાડનૈઃ ॥ ૩૩૬॥

પ્રીણયસ્વ મહાદેવં શરણં યાહિ શઙ્કરમ્ ।

શિવપૂજાર્થમાલસ્યં યઃ કરિષ્યતિ મૂઢધીઃ ॥ ૩૩૭॥

સ વિહાય ક્ષીરમન્નં વિષં પિબતિ સર્વથા ।
યદિ ત્યક્ષ્યસિ સાયાહ્ને મહાદેવસ્ય પૂજનમ્ ॥ ૩૩૮॥

તદા ત્વયા મયાપ્યદ્ય દુઃખં પ્રાપ્યં ન સંશયઃ ।
પત્રૈર્જલૈર્વા મન્ત્રૈર્વા પૂજિતઃ પરમેશ્વરઃ ॥ ૩૩૯॥

તુષ્ટો ભવતિ ગૌરીશસ્તમેવાર્ચય શઙ્કરમ્ ।
ધુત્તૂરકુસુમેનાપિ પૂજિતઃ શઙ્કરઃ સ્વયમ્ ॥ ૩૪૦॥

દદાતિ પરમં સ્થાનં યોગિનામપિ દુર્લભમ્ ।
તસ્માદુત્થાય યત્નેન પૂજયસ્વ સદાશિવમ્ ॥ ૩૪૧॥

સમ્પૂજ્ય સાયં વિશ્વેશં નિષ્પાપો ભવ સત્વરમ્ ।
સાયઙ્કાલે મહાદેવં યો નાર્ચયતિ શઙ્કરમ્ ॥ ૩૪૨॥

સ એવ સર્વપાપાનામાશ્રયો ભવતિ ધ્રુવમ્ ।
સાયં ત્યક્ત્વા શઙ્કરસ્ય દેવદેવસ્ય પૂજનમ્ ॥ ૩૪૩॥

યસ્તિષ્ઠત્યાપદમ્ભોધિમગ્નોઽસૌ નાત્ર સંશયઃ ।
ઐશ્વર્યં તુ મયા પ્રાપ્તં શઙ્કરસ્યૈવ પૂજયા ॥ ૩૪૪॥

તાદૃશેન કથં ત્યાજ્યં ત્વયા શઙ્કરપૂજનમ્ ।
યસ્માદૈશ્વર્યકામેન મોક્ષકામેન ચાનઘ ॥ ૩૪૫॥

કર્તવ્યમનિયત્નેન શઙ્કરસ્યૈવ પૂજનમ્ ।
મહાપાતકયુક્તો વા યુક્તો વા સર્વપાતકૈઃ ॥ ૩૪૬॥

મુચ્યતે પાતકૈઃ સર્વૈઃ પ્રદોષે શિવપૂજયા ।
હિતમેવ મયોક્તં તે નાહિતં વચ્મિ સર્વથા ॥ ૩૪૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કાલભૈરવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૧ । ૩૨૭.૨-૩૪૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 11 . 327.2-347..

Notes:

Lakṣmī લક્ષ્મી advises Viṣṇu વિષ્ણુ about worshiping Śiva શિવ during the evening-dusk especially Pradoṣakāla પ્રદોષકાલ.

Proofread by Ruma Dewan

*Lakshmiproktam Pradoshakale Shivopasanopadesham*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*